पौष्योपाख्याने । ३ । १२० । "न हि मे मन्युरद्यापि उपशमं गच्छति"। तथा प्रबोधचन्द्रोदये । ५ । १५ । "तथायमपि कृतकर्त्तव्यः संप्रति परमामुपशमनिष्ठां प्राप्तः" ॥)

उपशयः, पुं, (उप + शी + अच् ।) निदानपञ्चकान्तर्गतरोगज्ञानजनकः । तस्य लक्षणम् ।
"हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणाम् ।
औषधान्नविहाराणामुपयोगं सुखावहम् ॥
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः"।
इति निदानम् ॥ ("अस्मिन्नर्थे उपशयः पुनर्हेतुव्याधिविपरीतानां विपरीतार्थकारिणाञ्चौषधाहारविहाराणां उपयोगः सुखानुबन्धः"। इति चरके निदानस्थाने प्रथमोऽध्यायः ॥)

उपशल्यं, क्ली, (उपगतं शल्यम् ।) ग्रामप्रान्तभागः । तत्पर्य्यायः । ग्रामान्तम् २ । इत्यमरः ॥
(यथा, रघौ १५ । ६० ।
"उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ" ॥
"भ्रमंश्च विशालोपशल्ये कमप्याक्रीड़मासाद्य"। इति दशकुमारे ॥)

उपशायः, पुं, (उप + शी + घञ् ।) पर्य्यायशयनार्थकः । प्रहरिकादीनां क्रमेण शयनम् । तत्पर्य्यायः । विशायः २ । इत्यमरः ॥

उपश्रुतं, त्रि, (उप + श्रु + क्त ।) प्रतिश्रुतम् । अङ्गीकृतम् । इत्यमरः ॥

उपश्रुतिः, स्त्री, (उपश्रूयते । उप + श्रु + क्तिन् ।) दैवप्रश्नः । यथाह हारावली ॥
"नक्तं निर्गत्य यत् किञ्चिच्छुभाशुभकरं वचः ।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्" ॥
(उप समीपे श्रुतिः श्रवणम् । समीपश्रवणम् । उपमिता श्रुत्या । वेदसदृशी श्रुतिसदृशत्वात् तथात्वम् ॥)

उपष्टम्भकः, पुं, (उप + स्तम्भ + ण्वुल् ।) आधिक्यम् । यथा । उच्चैःश्रवादीन् तेजोभागोपष्टम्भकतया प्रत्यक्षयोग्यत्वात् । इति बौद्धाधिकारचिन्तामणिः ॥

उपसंग्रहः, पुं, (उपसंगृह्यते इति । उप + सम् + ग्रह + अप् ।) पादस्पर्शपूर्ब्बकनमस्कारः । तत्पर्य्यायः । पादग्रहणम् २ अभिवादनम् ३ । इति हेमचन्द्रः ॥ (उपकरणम् । यथा, महाभारते ४ । कीचकवधपर्ब्बणि । १६ । १५ ।
"उपातिष्ठन्महाबाहुः पर्य्यङ्के सोपसंग्रहे" ॥)

उपसंग्राह्यं, त्रि, (उपसंगृह्यते इति । उप + सम् + ग्रह + ण्यत् ।) उपसंग्रहणीयम् । अभिवाद्यम् । पादे ग्रहीतव्यम् । इति हलायुधः ॥
(यथा मनुः । २ । १३२ ।
"भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि" ॥)

उपसंव्यानं, क्ली, (उपसंवीयतेऽनेन । उप + सम् + व्ये + करणे ल्युट् इति ल्युट् ।) परिधानवस्त्रम् । इत्यमरः ॥ (यथा मुग्धबोधे शब्दसंज्ञायाम् ।
"बहिर्य्योगोपसंव्याने" ॥)

उपसंहारः, पुं, (उपसंहरणम् । उप + सम् + हृ + घञ् ।) अन्तः । शेषः । यथा ।
"उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च"। इति सप्तमीप्रकरणे तिथ्यादितत्त्वलिखनम् ॥ (एकत्रीकरणम् । सम्यगाहरणम् ॥)

उपसत्तिः, स्त्री, (उप + सद + क्तिन् ।) सङ्गमात्रम् । प्रतिपादनम् । सेवा । इति हेमचन्द्रः ॥

उपसद्, पुं, (उप + सद + क्विप् ।) अग्निविशेषः । यथा । वह्निपुराणे गणभेदनामाध्यायः ॥
"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः ।
एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः" ॥
(स्त्री, यज्ञभेदः । आश्वलायने ४।८।१ "अथोपसद्भिः प्रचरति"। इति । समीपस्थिते त्वाच्यलिङ्गः ॥)

उपसदनं, क्ली, (सदनस्य गृहस्य समीपे । यद्वा, उपं + सद + ल्युट् ।) गृहसमीपम् । (यथा रामायणे १ । ५० । १६ ।
"धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ।
यज्ञोपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह" ॥
उपसेवनम् । प्राप्तिः । यथा, महाभारते वनपर्ब्बणि ।
"तत्रोपसदनं चक्रे द्रोणस्येष्वस्त्रकर्म्मणि" ॥)

उपसन्नः, त्रि, (उप + सद + क्त ।) उपनतः । उपस्थितः । इति हेमचन्द्रः ॥ (यथा, महाभारते १२ । मोक्षधर्म्मपर्ब्बणि । २८७ । ११ ।
"ब्रवीतु भगवांस्तन्मे उपसन्नोऽस्म्यधीहि भोः" ॥)

उपसम्पन्नः, त्रि, (उप + सम् + पद + क्त ।) यज्ञार्थहतपशुः । तत्पर्य्यायः । प्रमीतः २ प्रोक्षितः ३ । पाकेन रूपरसादिसम्पन्नव्यञ्जनादिः । तत्पर्य्यायः । प्रणीतः २ । इत्यमरः । पर्य्याप्तः । संस्कृतः । प्राप्तः । मृतः । इति हेमचन्द्रः ॥ (यथा, मनुः । ५ । ८१ ।
"श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्" ॥)

उपसरः, पुं, (उप + सृ + अप् ।) स्त्रीगव्यादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । तत्पर्य्यायः । प्रजनः २ । इत्यमरः ॥ (यथा, पाणिनिः ३ । ३ । ७१ । "प्रजनं प्रथमगर्भग्रहणं गवामुपसरः" । निरवच्छेदगमनम् । यथा, भट्टिः । "वीनामुपसरं दृष्ट्वा"। अत्र जयमङ्गलस्त्वाह । "वीनां उपसरं नैरन्तर्य्येण निर्गमनम्" ॥)

उपसर्गः, पुं, (उप + सृज + घञ् ।) रोगभेदः । (यथा, सुश्रुते । "क्षीणं हन्युश्चोपसर्गाः प्रभूताः" ।) उपद्रवः । इति मेदिनी ॥ (यथा, मार्कण्डेये ९२ । ७ ।
"उपसर्गानशेषांस्तु महामारीसमुद्भवान्" ।)
धातोः पूर्ब्बवर्त्तिविंशतिसंख्यकप्राद्यव्ययम् । यथा । प्र । परा । अप । सम् । नि । अव । अनु । निर् । दुर् । वि । अधि । सु । उत् । परि । प्रति । अभि । अति । अपि । उप । आङ् । अस्य प्रमाणम् ।
"निपातांश्चादयो ज्ञेयाः उपसर्गास्तु प्रादयः ।
द्योतकत्वात् क्रियायोगे लोकादवगता इमे" ॥
स त्रिधा । "धात्वर्थं बाधते कश्चित्"। यथा आदत्ते । "कश्चित्तमनुवर्त्तते"। यथा प्रभूते । "तमेव विशिनष्ट्यन्यः"। यथा प्रणमति । "उपसर्गगतिस्त्रिधा"। अपि च ।
"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
नीहाराहारसंहारप्रतीहारप्रहारवत्" ॥
इति मुग्धबोधटीकायां दुर्गादासः ॥

उपसर्ज्जनं, क्ली, (उप + सृज + ल्युट् ।) प्रधानभिन्नम् । तत्पर्य्यायः । अप्रधानम् २ अप्राग्र्यम् ३ । इत्यमरः ॥
(यथा, मनुः ९ । २११ ।
"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते" ॥
(विशेषणम् । त्यागः । उपद्रवः । यथा अनध्यायप्रकरणे मनुः,—
"निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने" ॥)

उपसर्पकः, त्रि, (उप + सृप् + ण्वुल् ।) उपसर्पणकर्त्ता । उपासकः ॥

उपसर्य्या, स्त्री, (उप + सृ + उपसर्य्या काल्या प्रजने इति साधुः ।) प्राप्तगर्भग्रहणकाला गौः । ऋतुमती गौः । तत्पर्य्यायः । काल्या २ । इत्यमरः ॥ कालप्राप्ता ३ ईश्वरता ४ । इति शब्दरत्नावली ॥

उपसार्य्यः, त्रि, (उप + सृ + ण्यत् ।) समीपगमनीयः । (यथा, पाणिनिः ३।१।१०४ । "प्रजने काल्येति किम् उपसार्य्या काशीप्राप्तव्या इत्यर्थः" ॥)

उपसूर्य्यकं, क्ली, सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे कन् । चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थे कन् ॥ चन्द्रसूर्य्यमण्डलम् । इत्यमरः ॥

उपसृष्टं, क्ली, (उपसृज्यते स्म इति । उप + सृज + क्त ।) मैथुनम् । इति त्रिकाण्डशेषः । उपसर्गयुक्ते त्रि । तथा च याज्ञवल्क्यः ।
"तेनोपसृष्टो लभते न राज्यं राजनन्दनः" ॥
(ग्रहोपग्रस्तचन्द्रादिः । यथा मनुः,
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" ॥
व्याप्तम् । यथा, रघुः "रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः" ॥)

उपस्करः, पुं, (उप + कृ + अप् समवाये चेति सुट् ।) व्यञ्जनादिसंस्कारार्थधन्याकसर्षपपिष्टादिः । वेसार वाटना इत्यादि भाषा । तत्पर्य्यायः । वेसवारः २ । इत्यमरः ॥ (यथा रामायणे । २ । ६५ । ९ ।
"मङ्गलालम्भनीयानि प्राशनीयान्युपस्करान् ।
उपानिन्युस्तथा पुण्याः कुमारीबहुलाः स्त्रियः" ॥)
गृहवासोपकरणम् । तच्च दृषदुपलसूर्पादि । कनककुण्डलहारादि । इति श्रीह्याथतर्कालङ्कारः ॥
तथा च याज्ञवल्क्यः ।
"गृहोपस्करवाह्यानां दोह्याभरणकर्म्मिणाम् ।
मूल्यं लभन्तु यत्किञ्चित् शुल्कं तत्परिकीर्त्तितम्" ॥
(तथा च मनुः । ३ । ६८ ।
"पञ्चसूना गृहस्थस्य चूल्लीपेषण्युपस्करः" ॥
"सज्जोपस्करभेषजः"। इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्यायः ॥)

उपस्त्री, स्त्री, (उपमिता स्त्रिया ।) उपपत्नी । ढेमिनी इति भाषा ॥

उपस्थः, पुं, (उप + स्था + क ।) लिङ्गम् । भगः । क्रोड़ः । इति मेदिनी ॥ ("रथोपस्थ उपाविशत्"। इति गीतायां १ । ४६ ।) गुह्यद्वारम् । इति हेमचन्द्रः ॥ (यथा, मनुः । ८ । १२५ ।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" ॥)
निकटे त्रि । इति शब्दरत्नावली ॥